International Journal of Sanskrit Research 2018; 4(2): 62-67

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2018; 4(2): 62-67
© 2018 IJSR
www.anantaajournal.com
Received: 19-01-2018
Accepted: 22-02-2018

**Rubel Das**
Assistant Professor
Department of Sanskrit
Rishi Bankim Chandra College
Naihati, West Bengal, India

# पाणिनीयनयेऽसिद्धत्वविमर्शः

**रुबेल-दासः**

**प्रबन्धसारः**

पाणिनीयव्याकरणेऽसिद्धशब्दस्य प्रयोगो दृश्यते। महर्षि-पाणिनिना *अष्टाध्याय्यां* त्रिषु सूत्रेषु असिद्धशब्दस्य प्रयोगः कृतः। तानि च- (क) “पूर्वत्रासिद्धम्” (८/२/१) (ख) “षत्वतुकोऽसिद्धः” (६/१/८६) (ग) “असिद्धवदत्राभात्” (६/४/२२)। इतोऽपि पाणिनीयसम्प्रदाये स्वीकृतपरिभाषासु “असिद्धं बहिरङ्गमन्तरङ्गे” (परिभाषा ५०) इति परिभाषायां पदस्यास्य प्रयोगो दृश्यते। पाणिनिना व्यवहृतं शब्दसंस्कारे सहायकमन्यतमं कौशलममुमाश्रयीकृत्य वैयाकरणैः चर्चा क्रियते। वस्तुतो विषयस्यास्य चर्चायां केचन प्रश्नाः समुद्यन्ति। ते च- किं नामासिद्धत्वम्? अस्य प्रयोजनं किम्? शास्त्रेऽसिद्धत्वस्य को पक्षो ग्राह्यः? इति। विषयेऽस्मिन् समुदितप्रश्नानां समाधानामाश्रित्य प्रबन्धोऽयं लिखितः। पाणिनीयशास्त्रेऽसिद्धत्वमिति पारिभाषिकशब्दविषये यो विचारो विद्यते, सः सविस्तारमत्र स्थापितः। असिद्धत्वविषये मया यथाशास्त्रं सिद्धान्तो गृहीतः। आचार्य-नागेशेन *लघुशब्देन्दुशेखरे* “पूर्वत्रासिद्धम्” (८/२/१) इति सूत्रस्य व्याख्यायां सिद्धशब्दस्य बहुविधार्थोपस्थापनेन तद्वीपरीतस्यासिद्धशब्दस्याप्रवृत्तमनिष्पन्नं वेत्यर्थः स्पष्टीकृतः। इतोऽपि शास्त्रत्वासिद्धपक्षे विशेषस्थलमुक्त्वा तत्र सूत्रस्य कीदृशोऽर्थः स्यात्? सोऽपि परिष्कृतः। अतोऽसिद्धशब्दस्यार्थः शास्त्रे द्विधा प्रयुङ्क्ते स्म, १. अविद्यमानम् २. अनिष्पन्नम्। असिद्धत्वविधायकसूत्रेषु असिद्धवचनस्य प्रयोजनविषये प्रतीयते यत्- असिद्धकरणस्य प्रयोजनद्वयम्। प्रथमत आदेशलक्षणस्य प्रतिषेधार्थम्। द्वितीयत उत्सर्गलक्षणस्य भावार्थम्। असिद्धत्वे कः पक्षो ग्राह्यः स्यादिति प्रश्ने भट्टोजिदीक्षितेन *मनोरमा*यां कार्यत्वासिद्धे मनोरथादौ दोषान्प्रदर्श्य शास्त्रत्वासिद्धपक्ष आश्रीयते। तथाहि तेनोक्तम्- “एतेन त्रिपाद्यां विहितं कार्यमसिद्धमित्यादिः प्राचां ग्रन्थः परास्तः” इति। नागेशेन कार्यत्वासिद्धे ‘अमू’ इत्यादिरूपासिद्धिरूपदोषान् दर्शयित्वा शास्त्रत्वासिद्धपक्षः स्वीकृतः। *भाष्य*कारेण “असिद्धवदत्राभात्” (६/४/२२) इति सूत्रभाष्ये शास्त्रत्वासिद्धपक्षः सिद्धान्तितः। अतोऽसिद्धत्वे शास्त्रत्वासिद्धपक्षो वैध इति प्रतीयते।

**कूटशब्दः** “पूर्वत्रासिद्धम्”, “षत्वतुकोऽसिद्धः”, “असिद्धवदत्राभात्”, “असिद्धं बहिरङ्गमन्तरङ्गे”

## १. उपक्रमः

संस्कृतव्याकरणेषु पाणिनीयव्याकरणं सर्वप्रसिद्धं सर्वजनग्राह्यञ्च। व्याकरणमिदं पूर्णाङ्गं युक्तिसम्मतं समृद्धञ्च। व्याकरणमिदं त्रिमुनिव्याकरणमिति नाम्ना जनेषु प्रसिद्धम्। अत्र त्रयो मुनयस्तावत्- सूत्रकारः पाणिनिः, वार्त्तिककारः कात्यायनः, भाष्यकारः पतञ्जलिश्च। त्रिमुनिव्याकरणस्य मूलग्रन्थः पाणिनिना विरचिता *अष्टाध्यायी* । अत्र सर्वेषां वैदिकलौकिकसंस्कृतशब्दानां व्युत्पत्तये पाणिनिना विविधकौशलानामाश्रयणं कृतम्। ईदृशानां कौशलानां व्यवहारं विना विशालशब्दभाण्डारस्यायत्तीकरणम-सम्भवमित्यस्माकमुपलब्धिः। पाणिनेः शब्दसंस्कारे सहायकमन्यतमं कौशलमेकमाश्रयीकृत्य वैयाकरणानां मध्ये प्रायशः चर्चा दृश्यते। कौशलोऽयमं तावत्- ‘असिद्धत्वम्’। वस्तुतो विषयस्यास्य चर्चायां केचन प्रश्नाः समुद्यन्ति। ते च- किं नामासिद्धत्वम्? अस्य प्रयोजनं किम्? शास्त्रेऽसिद्धत्वस्य को पक्षो ग्राह्यः? इति। विषयेऽस्मिन् समुदितप्रश्नानां समाधानामाश्रित्य प्रबन्धमेकं रचयितुं शक्यते। अर्थाद्विषयोऽयं प्रबन्धयोग्य इति मनसि निधाय विषयममुमाधारीकृत्य प्रबन्धरचनकार्ये प्रवृत्तम्। प्रबन्धस्यास्य विरचने समीक्षात्मकपद्धतिः (Observation Method) आश्रयीकृता। पाणिनीयव्याकरणस्य सुबृहती परम्परा वर्तते। प्रबन्धस्य विषयसमृद्धये पाणिनिपरम्परायाम*ष्टाध्याय्या*दारभ्यो वर्तमानकालपर्यन्तं ये विरचितग्रन्थाः सिद्धान्ताश्च दृश्यन्ते, ते सर्वे गृह्यन्ते। यतः कस्यचित्सूत्रस्य सूत्रस्थपदस्य वा स्पष्टार्थप्रतिपत्तये *महाभाष्येण* सह वृत्तिग्रन्थानां तद्व्याख्यानाञ्चानुधावनं कर्तव्यम्।

## २. किं नामासिद्धत्वम्?

पाणिनीयव्याकरणेऽसिद्धशब्दस्य प्रयोगो दृश्यते। पाणिनिना *अष्टाध्याय्यां* त्रिषु सूत्रेषु असिद्धशब्दस्य प्रयोगः कृतः। तानि च- (क) “पूर्वत्रासिद्धम्” (८/२/१) (ख) “षत्वतुकोऽसिद्धः” (६/१/८६) (ग) “असिद्धवदत्राभात्” (६/४/२२)। इतोऽपि पाणिनीयसम्प्रदाये स्वीकृतपरिभाषासु “असिद्धं बहिरङ्गमन्तरङ्गे” (परिभाषा ५०) इति परिभाषायां पदस्यास्य प्रयोगो दृश्यते। स्वभावतोऽस्माकं मनसि प्रश्नो जायते पाणिनिना तच्छास्त्रे योऽसिद्धशब्दप्रयुक्तः तस्य स्वरूपं किम्? वस्तुतस्तु पाणिनीयशास्त्रे विचरणेनैव प्रश्नस्यास्य यथायथमुत्तरं प्राप्तुं शक्यते। विशेषत उपर्युल्लिखितानां पाणिनीयसूत्राणां परिभाषायाश्च शास्त्रीयालोचनेन प्रासङ्गिकविषये निश्चितसिद्धान्तं गृहीतुं शक्नुम इति मे धारणा। अतः सूत्रक्रमेणालोचनेन अग्रसरो विधेयः-

**Correspondence**
**Rubel Das**
Assistant Professor
Department of Sanskrit
Rishi Bankim Chandra College
Naihati, West Bengal, India

## २.१ पूर्वत्रासिद्धम् (८/२/१)

असिद्धत्वविषयकसूत्रेषु प्रथमं सूत्रं तावत् "पूर्वत्रासिद्धम्"। *काशिका*यां सूत्रस्यास्य वृत्तावुक्तम्- "पूर्वत्रासिद्धम्" इत्यधिकारोऽयमध्यायपरिसमाप्तेः। यदित उर्ध्वमनुक्रमिष्यामः 'पूर्वत्रासिद्धम्' इत्येवं तद्वेदितव्यम्। तत्र येयं सपादसप्ताध्यायामनुक्रान्ता एतस्यामयं पादोनोऽध्यायोऽसिद्धो भवति। इत उत्तरं चोत्तर उत्तरो योगः पूर्वत्र पूर्वत्रासिद्धो भवति = असिद्धवद्भवति। सिद्धकार्यं न करोतीत्यर्थः" इति।[1] वृत्तेः सूत्रमिदमधिकारसूत्रमिदं स्पष्टं भवति। सूत्रस्यास्य प्रयोगश्च कथं स्यात्तदपि स्पष्टीकृतम्। वृत्तौ असिद्धत्वविषये सामान्या अवधारणा प्राप्यते। तेनासिद्धत्वस्य असिद्धवदित्यतिदेशरूपार्थ क्रियते। तस्यार्थः क्रियते- 'सिद्धकार्यं न करोतीत्यर्थः' इति। भट्टोजिदीक्षितेन *सिद्धान्तकौमुद्यां* प्रस्तुतसूत्रस्य वृत्तौ असिद्धस्य परिभाषायां किमपि नोक्तम्। दीक्षितेन *सिद्धान्तकौमुद्यां* सूत्रस्यास्य वृत्ताविदमधिकारसूत्रमिति कथितम्।[2] *प्रौढमनोरमा*यां कथमिदं न विधिसूत्रम्, अधिकारसूत्रमेव तद्व्याख्यातम्।[3] नागेशाचार्येण *लघुशब्देन्दुशेखरे* "पूर्वत्रासिद्धम्" सूत्रस्य व्याख्यायामुक्तम्- "असिद्धमिति। सिद्धम् = निष्पन्नं प्रवृत्तम्। सिद्धश्च प्रत्ययविधावि' त्यादौ तथा दर्शनात्। तद्भिन्नम्- असिद्धमनिष्पनमप्रवृत्तम्" इति।[4] अर्थात् "सिद्धे शब्दार्थसम्बन्धे" इति *महाभाष्यस्य* पस्पशाह्निके आक्षेपसाधकवार्त्तिके सिद्धशब्दस्य नित्यार्थदृष्टेऽपि "सिद्धश्च प्रत्ययविधौ पुंवद्भावः" इति वार्त्तिकेऽस्य निष्पनार्थस्य ग्रहणात्तद्विपरीतस्यासिद्धस्याप्रनिष्पन्नमप्रवृत्तं वार्थो नागेशेन गृहीतः। इतोऽपि नागेशेन तत्रैव शास्त्रासिद्धत्वपक्षस्य समर्थनावसरेऽसिद्धत्वस्य स्वरूपमव्याख्यायत।

तन्मते यत्र त्रैपादिकसूत्रमन्तरङ्गात् (स्वनिमित्तस्य सत्त्वात्) सपाद-सप्ताध्यायीस्थसूत्रेभ्यः प्रागेव प्रवर्तते, तत्रापि सपादसप्ताध्यायीस्थसूत्राणां प्रवृत्तौ त्रिपादीस्थसूत्राणामभाव आरोप्यते। इहाभाव एव त्रिपादीनामसिद्धता। यदा त्रिपाद्यामभावस्यारोपः क्रियते, तदा तत्कृतकार्यस्याप्यभावः स्वतः स्यात्। कार्यस्याभावस्तावत्स्थानिनोऽनिवृत्तिबुद्धिः। अर्थात्स्थानिनः पूर्ववदवस्थानज्ञानम्। स्थानिनो निवृत्तेरभावात्तत्प्रयुक्तादेशबुद्धेरभावो जातत्वबुद्धेरभावश्च लक्ष्ये बोध्येते। अभावारोपस्य फलं तावत्सपादसप्ताध्यीस्थसूत्रैः करणीयं कार्यमसिद्धशास्त्रेण कृते आदेशे स्थानिज्ञानेन प्रवर्तनम्।[5]

नागेशेन प्रस्तुतसूत्रस्य कार्यं प्रतिपादितं यत्– अधिकारसूत्रमिदं यस्मिन् विधिसूत्रेऽनुवर्तते तत्पूर्वसूत्रं प्रत्यसिद्धं भवेदिति। सूत्रमिदं विधिसूत्रेषूपस्थितौ वाक्यभेदेनान्वितं भवति। विधेयभेदाद्वाक्यभेदः क्रियते। यथा "हो ढः" (८/२/३१) इत्यस्मिन् प्रस्तुतसूत्रस्योपस्थितौ वाक्यभेदेन सूत्रार्थो लभते- 'हस्य ढो भवति, इदं च शास्त्रं पूर्वत्रासिद्धम्' इति। एवम् "अदसोऽसेर्दादु दो मः" (८/२/८०) इति सूत्रस्यापि वाक्यद्वयं भवति। यथा- अदसोऽसान्तस्य दात्परस्य उदूतौ स्तः दस्य च मः, पूर्वशास्त्रस्य कर्तव्ये इदं मुत्वमसिद्धं स्यात्। अथ तेन वाक्यभेदस्य फलं दर्शितम्। "पूर्वत्रासिद्धम्" (८/२/१) इत्यधिकारसूत्रस्य वाक्यभेदेन विधिसूत्रेण सहान्वयेन वाक्यद्वये जाते "न मु ने" (८/२/३) इति सूत्रेणासिद्धत्वसम्पादकं द्वितीयवाक्यमेव प्रतिषिध्यते। अर्थान्नाभावे कर्तव्ये मुभावस्यासिद्धत्वं निरस्य मुभावो यथावस्थितः स्थाप्यते। अतो मुत्वभावस्य सिद्धत्वात् 'अमुना' इति पदं निष्पद्यते। सूत्रमिदं पदैकवाक्यतया अन्वयेन तु "अदसोऽसेर्दादु दो मः" इति विधिसूत्रस्यार्थः स्यात्- पूर्वशास्त्रस्य कर्तव्येऽसिद्धविशिष्टो मुत्वादेशो भवेदिति। "न मु ने" इति सूत्रेणासिद्धत्वस्य मुभावस्यैव निषेधात् 'अमुना' इत्यत्र मुत्वाभावादभीष्टरूपस्य सिद्धिर्न संभवेत्। अत उपर्युक्तेन विचारेण *शेखर*कारेण सिद्धान्तितः– अधिकारसूत्रमिदं विधिसूत्रैः सह वाक्यभेदेनान्वितं भवतीति। अर्थादिदं विधिसूत्रेण सहैकवाक्यतया लक्ष्योपयोगिवाक्यार्थबोधजनकं भवति।

"पूर्वत्रासिद्धम्" (८/२/१) इत्यधिकारसूत्रमिति पूर्वमुक्तम्। अस्यासिद्धाधिकारस्य सिद्धान्तस्तावत्- सपादसप्ताध्यायीं प्रति त्रिपादी असिद्धा, त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धमिति। किन्तु केषुचिद्विषयेषु अस्य नियमस्य उल्लङ्घनं भवतीति दृश्यते। यथा- १. त्रिपाद्यां विद्यमानमपवादसूत्रमुत्सर्गसूत्रं प्रति सिद्धं वर्तते। तक्षशब्दस्य प्रथमैकवचनविवक्षायां तक्ष्+सुँ इत्यत्र प्रकृतौ "संयोगान्तस्य लोपः" (८/२/२३) इति उत्सर्गसूत्रस्य "स्कोः संयोगाद्योरन्ते च" (८/२/२९) इत्यपवादसूत्रस्य च युगपत्प्रवृत्तौ अपवादसूत्रस्य परत्वेऽपि नासिद्धत्वम्। अर्थात्तस्य उत्सर्गसूत्रं प्रति सिद्धत्वात्तेन प्रकृतौ क्-वर्णस्य लोपो जायते। २. आश्रयत्वे परसूत्राणां सिद्धत्वं स्यात्। 'मनस् रथः' इत्यत्र "ससजुषो रुः" (८/२/६६) इत्यनेन रुत्वादेशात्परं "हशि च" (६/१/११४) इत्यनेन रोः य उत्वं विधीयते, तदुत्वं प्रति "ससजुषोः रुः" इति आश्रयात् सिद्धम्। यदि "हशि च" इति सूत्रविषये त्रिपादीस्थसूत्राणि असिद्धानि उच्यन्ते तर्हि एतत्सूत्रं स्थान्याभावाद् व्यर्थं स्यात्। अत एव "हशि च" इति सूत्रविधानं ज्ञापयति यद्, अस्य सूत्रस्य कृते त्रिपाद्याः रुत्वविधायकानि सर्वाणि सूत्राणि सिद्धानीति।

## २.२. षत्वतुकोरसिद्धः (६/१/८६)

षत्वे कर्तव्ये तुगागमे कर्तव्ये चैकादेशस्यासिद्धत्वविधायकं सूत्रमिदम्। *काशिका*यां सूत्रस्यास्य वृत्तावुक्तम्- "षत्वे तुकि च कर्तव्ये एकादेशोऽसिद्धो भवति, सिद्धकार्यं न करोतीत्यर्थः" इति।[6] अर्थाद् "एकः पूर्वपरयोः" (६/१/८४) इति सूत्रस्याधिकारे यानि सूत्राणि विद्यन्ते, तानि सर्वाणि सूत्राणि एकादेशविधायकानि। अस्मिन् अधिकारे विद्यमानैः सूत्रैः उक्ता आदेशाः पूर्व-परशब्दयोः स्थाने एकादेशरूपेण विधीयन्ते। एते आदेशाः षत्वकार्यार्थं तुगागमार्थं वासिद्धाः सन्ति (न दृश्यन्ते) — इत्याशयः। *काशिका*वृत्तौ उक्तस्यासिद्धत्वस्य 'सिद्धकार्यं न करोति' इति कृतार्थस्य *न्यासटी*कायां स्पष्टीकरणं कृतम्। तत्रोक्तम्- "सिद्धकार्यं न करोतीत्यर्थः' इति। सिद्धस्य निष्पन्नस्य यत् कार्यं तदेकादेशः सिद्धो निष्पन्नोऽपि न करोतीत्ययमस्य वचनस्यार्थः" इति।[7] भट्टोजिदीक्षितेन *सिद्धान्तकौमुद्यां* सूत्रस्यास्य वृत्तौ केवलं सूत्रस्यार्थ एव व्यक्तः। किन्तु असिद्धत्वस्यार्थो न परिष्क्रियते। तेनोक्तम्- "षत्वे तुकि च कर्तव्ये एकादेशशास्त्रमसिद्धं स्यात्। कोऽसिचत्, इह षत्वं न। अधीत्य। प्रेत्य। 'ह्रस्वस्य—' (सू २८५८) इति तुक्" इति।[8]

पाणिनेः प्रोक्तनियमस्य व्यत्ययं संलक्ष्य महर्षिकात्यायनेन वार्त्तिकं कृतम्- 'सम्प्रसारण-ङि-इट्सु प्रतिषेधो वक्तव्यः'[9] इति। अस्यार्थः स्यात्- संप्रसारणसम्बन्धी एकादेशः, ङिप्रत्ययमुपयुज्य कृतः एकादेशः, इट्प्रत्ययविषयकः एकादेशश्च षत्वविधौ तुगागमे च नासिद्धा भवन्ति। तेन षत्वविधौ सम्प्रसारणसम्बन्धिन एकादेशस्य सिद्धत्वे 'ब्रह्महूषु' इति पदं सिद्ध्यति। इतः तुगागमविधौ ङि-प्रत्ययविशिष्टस्यैकादेशस्य सिद्धत्वे एव 'वृक्षे छाया' इति संहितायां विषये "पदान्ताद्वा" (६/१/७६) इत्यनेन विकल्पेन तुगागमे 'वृक्षेच्छाया', 'वृक्षे छाया' इति रूपद्वयोः सिद्धिः स्यात्। एवञ्च तुगागमविधौ इट्प्रत्ययविशिष्टस्यैकादेशस्य सिद्धत्वे 'अलभे छायाम्' इति संहितायां "पदान्ताद्वा" इत्यनेन विकल्पेन तुगागमे 'अलभेच्छायाम्' 'अलभेछायाम्' इति रूपद्वयोः सिद्धिर्भवति।

## २.३. असिद्धवदत्राभात् (६/४/२२)

सूत्रमिदमधिकारसूत्रम्। "ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानि च्छन्दसि" (६/४/१७५) इति सूत्रपर्यन्तं प्रस्तुतसूत्रस्याधिकारः। अर्थात् "श्नान्नलोपः" (६/४/२३) इति सूत्रात्पादस्यास्यान्तिमसूत्रपर्यन्तं पठितानि सूत्राणि समानाश्रये कर्तव्ये परस्पराणां सन्दर्भेऽसिद्धानि भवन्ति। तथाहि सूत्रस्य वृत्तौ *काशिका*यामुक्तम्- "असिद्धवतित्ययमधिकारो यदित ऊर्ध्वमनुक्रमिष्याम आ अध्यायपरिसमाप्तेस्तद् असिद्धवद्भवतीत्येवं वेदितव्यम्। आ भादिति विषयनिर्देशः। आभसंशब्दनाद् यदुच्यते तत्र कर्तव्ये" इति।[10] प्रस्तुतसूत्रेण यदसिद्धत्वं विहितं तदाभीयासिद्धत्वम्। भट्टोजिदीक्षितेन *सिद्धान्तकौमुद्या*मस्य वृत्तावुक्तम्- "इत उर्ध्वमापादपरिसमाप्तेराभीयम्। समानाश्रये तस्मिन्कर्तव्ये तदसिद्धं स्यात्" इति।[11] सूत्रार्थस्य परिष्कारे 'समानाश्रयः' इति पदस्यार्थोऽतीव तात्पर्यवहः। नागेशेन *लघुशब्देन्दुशेखरे* पदस्यास्य व्याख्यायामुक्तम्- "तत्र हि समानाश्रयत्वम् असिद्धत्वाश्रयशास्त्रसम्बन्धिनिमित्त-समुदायान्यूनानतिरिक्ताश्रयकत्वम्" इति। कस्मिञ्चिल्लक्ष्ये सूत्रस्य प्रयोगार्थं मूलस्थानिनो मूलनिमित्तस्य चावश्यकत्वात्तयोः तत्सूत्रं प्रति आश्रयत्वम्। यदि द्वयोः सूत्रयोः आश्रयाः सम्पूर्णरूपेण समाना भवन्ति, तर्हि तयोर्मध्ये समानाश्रयोऽस्तीति वक्तव्यः। यथा अस्-धातोः लोट्-लकारस्य मध्यमपुरुषैकवचनविवक्षायां अस्-धातोः हि-प्रत्यये परे "श्नसोरल्लोपः" (६/४/१११) इत्यनेन अकारलोपः "घ्वसोरेद्धावभ्यास-लोपश्च" (६/४/११९) इत्यनेन एकास्यान्तादेशश्च समं प्राप्येते। अत्र लक्ष्ये प्रवृत्तयोरूभययोः सूत्रयोः आश्रयौ 'अस्, हि' इति। अतः सूत्रद्वयोर्मध्ये समानाश्रयोऽस्तीति लक्ष्यते। सूत्रे 'असिद्धवद्' इति शब्दः 'असिद्धः' इत्यर्थे प्रयुक्तः। पाणिनिना कथमसिद्धमिति लघुशब्दं विहाय असिद्धवदिति गुरुशब्दस्य प्रयोगः कृतः, तदव्याख्यानं शास्त्रेष्वनुपलब्धम्। भाष्येऽसिद्धशब्दस्य यत्प्रयोजनद्वयं दर्शितं ततोऽनुमीयते यदत्रासिद्धशब्दः समानाश्रयप्रथमसूत्रस्य निषेधार्थः। अर्थात् प्रथमसूत्रेण

कृत आदेशो द्वितीयसूत्रं प्रत्यसिद्धः। अर्थात्समानाश्रितप्रथमसूत्रेण विहितादेशः समानाश्रितद्वितीयसूत्रं न दृश्यते। तेन 'जहि' इत्यादीनां सिद्धिर्भवति।

आभीयासिद्धाधिकरणप्रकरणे पूर्वोक्तनियमस्य व्यत्ययदर्शनात् कात्यायनेन वार्त्तिकं क्रियते यत्- "वुग्युटावुवङ्यणोः सिद्धौ भवत इति वक्तव्यम्" (का.वा. ११) इति। वार्त्तिकेनानेन नियमद्वयं ज्ञाप्यते। प्रथमतः "भुवो वुग् लुङ्-लिटोः" (६/४/८८) इत्यनेन निर्दिष्टो वुगागमः "अचि श्नुधातुभ्रुवां य्वोरियङुवङौ" (६/४/७७) इत्यनेन निर्दिष्टस्य उवङादेशस्य कृते सिद्धः स्यात्। अनेन भूधातोर्लिटि प्रथमपुरुषस्यैकवचनविवक्षायां 'बभूव' इति पदस्य सिद्धिः स्यात्। द्वितीयतः "दीङो युडचि क्ङिति" (६/४/६३) इत्यनेन निर्दिष्टो युडागमः "एरनेकाचोऽसंयोगपूर्वस्य" (६/४/८२) इत्यनेन निर्दिष्टस्य यणादेशस्य कृते सिद्धः स्यादित्याशयः। अन्यथा दीङ्धातोर्लिटि प्रथमपुरुषैकवचनविवक्षायां 'दिदीये' इति रूपस्य सिद्धिर्न भवेत्।

## २.४. असिद्धं बहिरङ्गमन्तरङ्गे (परिभाषा ५०)

पाणिनीयव्याकरणे शास्त्रीयकार्यनिर्वाहे विरचितपरिभाषासु परिभाषेयमन्यतमा। यद्यपि परिभाषेयं पाणिनिना न विरचिता। इयं पूर्वाचार्याल्लब्ध्वा, नागेशेन *परिभाषेन्दुशेखरे* संकलिता। अनया परिभाषया यदसिद्धत्वं विधीयते तद्बहिरङ्गासिद्धत्वम्। परिभाषेयं "वाह ऊठ्" (६/४/१३२) इति सूत्रस्यालोचनायां पतञ्जलिना *महाभाष्ये* पठितम्। अस्या अर्थस्तावत्- जनिष्यमानेऽन्तरङ्गे कार्ये कर्तव्ये जातं जायमानं वा बहिरङ्गमसिद्धं भवति। ननु किं नामान्तरङ्गकार्यम्? किञ्च बहिरङ्गं कार्यम्? उत्तरं तावत्- यस्मिन् कार्ये निमित्तमन्तरङ्गं (सौत्रक्रमे पूर्वं विद्यते, वा न्यूनं शर्तमपेक्ष्यते) तदन्तरङ्गकार्यम्, यस्मिन्कार्ये निमित्तानि बहिर्भूतानि (सौत्रक्रमे परं विद्यते, वा अधिकं शर्तं विद्यते), तद्बहिरङ्गकार्यम्। नागेशेनोक्तम्- "अन्तर्मध्ये बहिरङ्ग-शास्त्रीयनिमित्तसमुदायमध्येऽन्तर्भूतान्यङ्गानि निमित्तानि यस्य तदन्तरङ्गम्। एवं तदीयनिमित्तसमुदायाद्बहिर्भूताङ्गकं बहिरङ्गम्" इति।[12]

प्रस्तुतपरिभाषायाः ज्ञापकं तावत्- "वाह् ऊठ्" इति सूत्रे 'ऊठ्' इति पदग्रहणम्। विश्ववाह्-शब्दस्योत्तरं द्वितीयविभक्तेर्बहुवचनविवक्षायां शस्-विभक्तौ अनुबन्धलोपे 'विश्ववाह् अस्' इति जाते "वाह् ऊठ्" इत्यनेन व-कारस्य सम्प्रसारणसंज्ञको-ठादेशात्परं 'विश्व ऊ आह अस्' इति निष्पन्ने 'ऊ आ' इत्यत्र सम्प्रसारणाच्च इत्यनेन पूर्वरूपे 'विश्व ऊह् अस्' इति स्थिते 'विश्व ऊह्' इत्यत्र "एत्येधत्यठ्सु" (६/१/८९) इत्यनेन वृद्ध्यैकदेशे संयोगे च 'विश्वौहः' इति पदं निष्पद्यते। वस्तुतो यदि "वाह् ऊठ्" इत्यस्मिन् सूत्रे 'ऊठ्' इत्यस्य ग्रहणं न कृत्वा केवलं व-कारस्य सम्प्रसारणेन ततः 'उह्' इत्यस्य लघूपधगुणेन (उह्> औह्) तस्य विश्वशब्देन "वृद्धिरेचि" (६/१/८८) इत्यनेन वृद्ध्यैकादेशः क्रियते तदापि 'विश्वौहः' इति पदसिद्धिः स्यात्, तथापि तन्न कृत्वा "वाह ऊठ्" इत्यस्मिन् ऊठो ग्रहणात् प्रतीयते यद्बहिरङ्गादन्तगङ्गशास्त्रं बलवद्भवति। वस्तुतस्तु प्रस्तुतपरिभाषायाः ज्ञापकसूत्रस्याभीयासिद्धाधिकारे-ऽन्तर्भुक्तत्वात् परिभाषेयमपि आभीयासिद्धाधिकारस्थेति। तेनाभीयसूत्राणां बहिरङ्गान्तरङ्गविषये इयं परिभाषा "असिद्धवदत्राभात्" (६/४/२२) इति सूत्रेणासिद्धा भवति। फलत आभीयं बहिरङ्गं कार्यमन्यदाभीयमन्तरङ्गकार्यं प्रत्यवश्यमेव सिद्धं स्यादिति ज्ञेयम्। इमां प्रक्रियामाश्रित्यैव पाधातोः छन्दसि लिटि "क्वसुश्च" (३/२/१०७) इत्यनेन क्वसु-प्रत्यये 'पपुषः' इति पदं सिद्ध्यति।

## ३. असिद्धकरणस्य प्रयोजनं किम्?

ननु शास्त्रेऽसिद्धकरणस्य प्रयोजनं किम्? इति प्रश्नस्योत्तरं लक्ष्यभेदात् पृथगिति निश्चितम्। यथा *काशिकायां* "पूर्वत्रासिद्धम्" (८/२/१) इत्यस्य वृत्तौ असिद्धत्वस्य प्रयोजनद्वयमुक्तम्। प्रथमत आदेशलक्षणस्य प्रतिषेधार्थम्। द्वितीयतः स्थानिलक्षणभावार्थम्। तत्रोक्तं यथा- "तदेतदसिद्धत्ववचनमादेशलक्षणप्रतिषेधार्थम्, उत्सर्गलक्षणभावार्थं च" इति।[13] सूत्रस्यास्य *महाभाष्ये*ऽपि पदस्यास्य प्रयोजनद्वयं सोदाहरणं दर्श्यते स्म्। पतञ्जलिनोक्तं यत् "षत्वतुकोऽसिद्धः" (६/१/८६) इति सूत्रेऽसिद्धवचनस्य प्रयोजनद्वयस्य दर्शनादत्राप्यस्य आदेशलक्षणप्रतिषेधार्थमुत्सर्ग-लक्षणभावार्थञ्चेति द्वे प्रयोजने स्वीक्रियेते स्म। तेन आदेशलक्षणप्रतिषेधार्थ-मित्यस्योदाहरणान्युल्लिखितानि- राजभिः तक्षभिः राजभ्यां तक्षभ्याम् राजसु तक्षसु इति। उत्सर्गलक्षणभावार्थमित्यस्योदाहरणानि तावत्- अमुष्मै अमुष्मात् अमुष्य अमुष्मिन् इति।[14] प्रथमप्रयोजनस्योदाहरणं तावद्- हर एहीति। 'हरे + एहि' इति लक्ष्ये "एचोऽयवायावः" (६/१/७५) इत्यनेन सूत्रेण एकारस्य स्थानेऽयादेशे 'हर य् एहि' इति निष्पन्ने "लोपः शाकल्यस्य" (८/३/१९) इत्यनेन यकारस्य लोपे 'हर एहि' इति रूपसिद्धिर्भवति। ननु यकारस्य लोपात्परं 'हर एहि' इति स्थिते "ओमाङोश्च" (६/१/९२) इत्यनेन सूत्रेण अकारैकारयोः स्थाने पररूपैकारस्य प्राप्तेः 'हरेहि' इति रूपाशङ्का जायते। असाधुव्युत्पत्तेर्निराकरणाय पाणिनिना "पूर्वत्रासिद्धम्" इति शास्त्रस्यावतरणं कृतम्। अनेन पररूपविधायकशास्त्रस्य सपादसप्ताध्यायीत्वात्तद्दृष्ट्या "लोपः शाकल्यस्य" इति त्रिपादीस्थसूत्रस्यासिद्धत्वाद् यलोपादेशात्परं यो गुणादेशः, तन्निषेधः स्यात्। तेन 'हरेहि' इति असाधुरूपस्य शङ्का न भवति। 'अमुष्मै' इति रूपस्य सिद्धावसिद्धत्वस्य द्वितीयं प्रयोजनं दर्शितम्। अदस्-शब्दस्योत्तरं चतुर्थीविभक्तेरेकवचनविवक्षायां ङे-विभक्तौ 'अदस् ङे' इत्यवस्थायां "त्यदादीनामः" (७/२/१०२) इत्यनेन अदसः सकारस्य अकारादेशे 'अद अ ङे' इति जाते "अतो गुणे" (६/१/९४) इत्यनेन पूर्वत्र पररूपे 'अद ङे' इति स्थिते "सर्वनाम्नः स्मै" (७/१/१४) इत्यनेन ङे-विभक्तेः स्थाने स्मै आदेशः, "अदसोऽसेर्दादु दो मः" (८/२/८०) इत्यनेन दकारस्य मकारः, दकारोत्तरवर्तिनोऽकारस्य उकारश्चेति युगपत्प्राप्येते। "विप्रतिषेधे परं कार्यम्" (१/४/२) इति सूत्रानुसारेण परसूत्रेण विहितकार्यस्य न्याय्यत्वात्तत्र लक्ष्ये पूर्वं दकारस्य मुत्वम् अकारस्योत्वञ्च करणीये। ततः 'अमु ङे' इति जाते 'अमु' इत्यस्मात् अकारस्याभावात् "सर्वनाम्नः स्मै" इति स्मायादेशविधायकसूत्रस्य प्रवृत्तिर्न स्यात्। अतः स्थलेऽस्मिन् "पूर्वत्रासिद्धम्" इति असिद्धविधायकशास्त्रेण "सर्वनाम्नः स्मै" इति सपादसप्ताध्यायीस्थसूत्रं प्रति "अदसोऽसेर्दादु दो मः" इति मुत्वोत्वविधायकं त्रिपादीस्थसूत्रमसिद्धं भवेत्। तेन 'अद ङे' इत्यत्र ङे-विभक्तिस्थाने पूर्वस्थसूत्रानुसारेण स्मायादेशात्परं 'अद स्मै' इति जाते ततः "अदसोऽसेर्दादु दो मः" इत्यनेन दकास्य मकारादेशे दकारोत्तरवर्त्तिनो-ऽकारस्योकारादेशे च 'अमुष्मै' इति पदस्य सिद्धिर्भवति। अत्रादेशात्परमेव स्थानिमिनित्तकमुत्वोत्वविधायकशास्त्रं प्रवर्तते।

"षत्वतुकोऽसिद्धः" (६/१/८६) इति सूत्रेऽसिद्धत्वे प्रयोजनद्वयं विद्यते इति *महाभाष्ये* उक्तम्। तत्र भाष्ये "किमर्थमिदमुच्यते? इति प्रश्नस्योत्तरे उक्तम्- "षत्वतुकोऽसिद्धत्वमुच्यते, आदेशलक्षणप्रतिषेधार्थमुत्सर्गलक्षणभावार्थं च। आदेशलक्षणप्रतिषेधार्थं तावत्- कोऽसिञ्चत् सोऽसिञ्चत्। एकादेशे कृते इण इति षत्वं प्राप्नोति, असिद्धत्वान्न भवति। उत्सर्गलक्षणभावार्थं च- अधीत्य, प्रेत्य। एकादेशे कृते ह्रस्वस्य--- इति तुग्न प्राप्नोति, असिद्धत्वाद्भवति।"[15] इति। *काशिकाया*मपि अनुरूपं प्रयोजनमुक्तम्- "असिद्धवचनमादेशलक्षणप्रतिषेधार्थम्, उत्सर्गलक्षणभावार्थं च....." इत्यादि।[16] अथोदाहरणमुखेनासिद्धत्वस्य प्रयोजनं दर्श्यते। प्रथमप्रयोजनं तावत्- 'कोसिञ्चत्' इत्यादिप्रयोगस्थले षत्ववारणम्। 'क स् असिञ्चत्' इति संहितायां विषये "ससजुषो रुः" (८/२/६६) इत्यनेन सकारस्य रुत्वे तस्य रोः "अतो रोरप्लुतादप्लुते" (६/१/११३) इत्यनेन उकारादेशे 'क उ असिञ्चत्' इति जाते "आद्गुणः" (६/१/८७), इत्यनेन अकारोकारयोः ओकारेति गुणैकादेशे 'को असिञ्चत्' इति स्थिते ततः "एङः पदान्तादति" (६/१/१०९) इत्यनेन पदान्तादेङः अति परे पूर्वपरयोः पूर्वरूपैकादेशे 'कोसिञ्चत्' इति निष्पन्ने "आदेशप्रत्यययोः" (८/३/५९) इत्यनेन ओकारपरस्य सकारस्य षकारापत्तौ "आद्गुणः", "एङः पदान्तादति" इत्याभ्यां सूत्राभ्यामादिष्टस्य पूर्वरूपैकादेशस्य "षत्वतुकोरसिद्धः" इत्यनेनासिद्धत्वे 'कोसिञ्चत्' इत्यत्र षत्वापत्तिर्न स्यात्। अतः 'कोसिञ्चत्' इति साधुरूपं सिद्धम्। अथ द्वितीयं प्रयोजनं व्याख्यायते। 'अधीत्य' इत्यादिषु तुगागमो यथा स्यात्तस्मात्पूर्वं विहितैकादेशस्य तुगागमे कर्तव्येऽसिद्धः क्रियते। तुगागमविषयकानि चत्वारि सूत्राणि सन्ति- "ह्रस्वस्य पिति कृति तुक्" (६/१/७१), "छेः च" (६/१/७३), "दीर्घात्" (६/१/७५), पदान्ताद्वा (६/१/७६)। अध्युपसर्ग-पूर्वकाद् इ-धातोः क्त्वा-प्रत्यये कृते ततः "समासेऽनञ्पूर्वे क्त्वो ल्यप्" (७/१/३७) इत्यनेन क्त्वो ल्यप्प्रत्ययेऽनुबन्धलोपे च 'अधि इ य' इति स्थिते धातूपसर्गयोः कार्यस्यान्तरङ्गत्वात् "अकः सवर्णे दीर्घः" (६/१/१०१) इत्यनेन पूर्वत्र दीर्घैकादेशे 'अधी य' इति जातेऽत्र लक्ष्ये ह्रस्वाभावे तुगागमविधायकस्य "ह्रस्वस्य पिति कृति तुक्" इति सूत्रस्य प्रवृत्तिर्न भवति। यदि तुगागमविधायकस्य सूत्रस्य प्रवृत्तिर्न स्यात्तर्हि 'अधीत्य' इति पदस्य व्युत्पत्तिर्न स्यात्। तुगागमो यथा स्यात्तस्माद् ह्रस्वेद्वयोः दीर्घैकादेशविधायकं "अकः सवर्णे दीर्घः" इति सूत्रमसिद्धमित्युच्यते। अतः तत्सूत्रकृतदीर्घैकादेशकार्यस्य तुगागमे कर्तव्येऽसिद्धत्वात्तुगागमे बाधाभावेऽधीत्येति पदं जातम्।

"असिद्धवदत्राभात्" (६/४/२२) इति सूत्रेऽसिद्धपदस्य प्रयोजनदर्शनवार्त्तिकस्य[17] व्याख्यावसरे *महाभाष्ये* उक्तम्- "किमुक्तम्। तत्र तावदुक्तम्- षत्वतुकोऽसिद्धवचनमादेशलक्षणप्रतिषेधार्थमुत्सर्गलक्षणभावार्थं चेति। इहापि – असिद्धवचनमादेशलक्षणप्रतिषेधार्थमुत्सर्गलक्षणभावार्थं च" इति।[18] असिद्धकरणस्य प्रथमं प्रयोजनमुदाहरणेन परिष्क्रियते- हन्-धातोः लोटि मध्यमपुरुषस्यैकवचनविवक्षायां सिप्-प्रत्यये ततः "सेर्ह्यपिच्च" (३/४/८७) इत्यनेन सिप्प्रत्ययस्य 'हि' (अपित्) इत्यादेशे 'हन् हि' इति जाते ततः "हन्तेर्जः" (६/४/३६) इत्यनेन प्रकृतेः हनो जकारादेशे 'ज हि' इति पदं निष्पन्नं भवति। निष्पन्ने जहि-पदे "अतो हेः" (६/४/१०५) इति सूत्रस्य प्रवृत्तौ 'जहि' इति प्रकृतेः जकारस्याकारान्तत्वात्तदुत्तरस्य हि-प्रत्ययस्य लुक् स्यात्। तेन 'जहि' इत्यभीष्टपदस्य व्युत्पत्तिर्न सम्भवति। पदस्यास्य व्युत्पत्तये पाणिनिना प्रकृतसूत्रं प्रस्तूयते। प्रस्तुतसूत्रद्वयं "असिद्धवदत्राभात्" इति पाणिनीयसूत्रस्याधिकारेऽस्ति। तेन "हन्तेर्जः" "अतो हेः" इति सूत्रद्वयोः समानाश्रयत्वादाभीयकार्ये "अतो हेः" इति सूत्रादपेक्षया "हन्तेर्जः" इति सूत्रस्यासिद्धत्वात् "अतो हेः" इति सूत्रस्य प्रवृत्तिर्न भवति। तेन 'जहि' इति साधुपदं व्युत्पन्नम्। असिद्धवचनस्य द्वितीयं प्रयोजनस्योदाहरणं तावत्- 'एधि' इति पदम्। अस्-धातोः लोटि मध्यमपुरुषस्यैकवचनविवक्षायां सिप्प्रत्यये ततः "कर्तरि शप्" (३/१/६८) इत्यनेन धातोरुत्तरं शप्-प्रत्यये 'अस् शप् सिपः' इति स्थिते "अदिप्रभृतिभ्यः शपः" (२/४/७२) इत्यनेन शपो लुकि "सेर्ह्यपिच्च" (३/४/८७) इत्यनेन सिपः स्थाने ह्यादेशे 'अस् हि' इति स्थिते ततः "श्नसोरल्लोपः" (६/४/१११) इत्यनेन हि-प्रत्यये परे अस्-धातोरकारस्य लोपः "घ्वसोरेद्धावभ्यासलोपश्च" (६/४/११९) इत्यनेन हि-परे अस्-धातोः एकारश्च युगपत् प्राप्येते। तेन "श्नसोरल्लोपः" इत्यनेन प्रकृतेरलोपात्परं "घ्वसोरेद्धावभ्यासलोपश्च" इत्यनेन अस्-धातोः एकारो भवितुं नार्हति। तेन 'एधि' इति पदस्यासिद्धिः। तथाहि पाणिनिना "असिद्धवदत्राभात्" (६/४/२२) इत्यनेन उक्तसूत्रद्वयोर्मध्ये समानाश्रयत्वाल्लक्ष्ये युगपत्प्राप्तसूत्रयोः आदिसूत्रं द्वितीयसूत्रस्य कृतेऽसिद्धं क्रियते। तेन "घ्वसोरेद्धावभ्यासलोपश्च" इति सूत्रं तत्प्रवृत्तौ 'अस्' इत्येव दृश्यते। अतोऽनेन अस्-धातोः एकारादेशे कापि समस्या नास्ति। 'ए हि' इत्यत्र हि-परे झलोऽभावात् "हुझल्भ्यो हेर्धिः" (६/४/१०१) इत्यस्य प्रवृत्तिर्न भवति। लक्ष्ये "घ्वसोरेद्धावभ्यासलोपश्च" "हुझल्भ्यो हेर्धिः" इत्यनयोः युगपत्प्रवृत्तौ तयोश्च समानाश्रयत्वात् "घ्वसोरेद्धावभ्यासलोपश्च" इति सूत्रं "हुझल्भ्यो हेर्धिः" इति सूत्रं प्रत्यसिद्धं भवति। अस्यां स्थितौ "घ्वसोरेद्धावभ्यासलोपश्च" इत्यनेन कृतः एकारादेशः "हुझल्भ्यो हेर्धिः" इत्यनेन न दृश्यते। अतः 'ए हि' इत्यत्र "हुझल्भ्यो हेर्धिः" इत्यनेन हेः ध्यादेशे 'एधि' इति पदं व्युत्पन्नम्।

"असिद्धं बहिरङ्गमन्तरङ्गे" (परिभाषा ५०) इति परिभाषायाः प्रयोजनन्तावद् द्विविधम्। प्रथमतो लक्ष्येऽन्तरङ्गबहिरङ्गशास्त्रयोर्युगपत्प्रवृत्तौ अन्तरङ्गेण बहिरङ्गशास्त्रमसिद्धं सन्निवृतं भवति। तेन 'शिवेहि' इत्यादि पदं सिद्धं स्यात्। यथा 'शिव आ एहि' इत्यवस्थायां 'शिव आ' इत्यत्र "अकः सवर्णे दीर्घः" (६/१/१०१) इत्यनेन सूत्रेण सवर्णदीर्घस्य 'आ एहि' इत्यत्र "आद्गुणः" (६/१/८७) इत्यनेन गुणैकदेशस्य च प्राप्तिः स्यात्। ततोऽनया परिभाषया धातूपसर्गयोः कार्यस्यान्तरङ्गत्वात्तस्य बलीयत्वे पूर्वं गुणकार्ये 'एहि' इति पदं निष्पद्यते। ततः "अन्तादिवच्च" (६/१/८५) इत्यनेन सूत्रेण पूर्वान्तवद्भावाद् "ओमाङोश्च" (६/१/९५) इत्यनेन पररूपे 'शिवेहि' इति रूपं सिद्धम्। द्वितीयतः अन्तरङ्गशास्त्रस्य प्रसक्तौ बहिरङ्गशास्त्रस्य कार्यमसिद्धं भवति। अर्थाद्बहिरङ्गशास्त्रेण कृतं कार्यमन्तरङ्गं शास्त्रं न पश्यति। तस्मात् 'पचामेदम्' इत्यादिलक्ष्येषु "एत ऐ" (३/४/९३) इत्यनेन सूत्रेण ऐकारादेशापत्तिर्न भवति। यथा पच्-धातोः लोटि उत्तमपुरुषस्य बहुवचनविवक्षायाम् आम्-विभक्तौ 'पच् आम्' इति संयोगे 'पचाम' इति जाते तस्माद् 'इदम्' इति पदे स्थिते संहितायां "आद्गुणः" (६/१/८७) इत्यनेन 'पचामेदम्' इति पदं व्युत्पद्यते। अस्यामवस्थायां 'पचामे' इत्यत्र "एत ऐ" इति सूत्रस्य प्रसक्तौ प्रस्तुतपरिभाषायाः प्रवृत्तिर्भवति। 'पचामे' इति लक्ष्येऽन्तरङ्गं तावत् "एत ऐ" इति सूत्रम्। यतः 'पचामे' इत्यत्र एतः ऐकारादेशे निमित्तं न्यूनमस्ति। किन्तु "आद्गुणः" इति बहिरङ्गशास्त्रम्। यतोऽनेन सूत्रेण 'पचाम इदम्' इत्यत्र गुणादेशकार्येऽधिकं निमित्तमपेक्ष्यते। अतो लक्ष्येऽस्मिन् अन्तरङ्गकार्ये कर्तव्ये बहिरङ्गशास्त्रेण कृतकार्यस्य दर्शनं न भवेत्। तेन "एत ऐ" इत्यन्तरङ्गशास्त्रम् "आद्गुणः" इति बहिरङ्गशास्त्रेण कृतमेकादेशकार्यं न पश्येत्। अतः 'पचाम इदम्' इत्यत्र निमित्ताभावात् "एत ऐ" इति सूत्रस्य प्रवृत्त्यभावे 'पचामेदम्' इति पदसिद्धिः स्यात्। "परनित्यान्तरङ्गापवादानामुत्तरोत्तरं वलीयः" (परिभाषा ३९) - इति नियमानुसारं विप्रतिषेधे परं शास्त्रं बलवद्भवति। परशास्त्रनित्यशास्त्रयोर्नित्यशास्त्रं बलवद्भवति। एवं नित्यशास्त्रान्तरङ्गशास्त्रयोरन्तरङ्गशास्त्रस्य कार्यं पूर्वं स्यात्। पूर्वोक्तशास्त्रेभ्योऽपवादशास्त्रमधिकं बलीयः। एषां समं प्राप्ते बलादपवादशास्त्रस्य कार्यमेव प्राग्भवति।

## ४. शास्त्रेऽसिद्धस्य कः पक्षो ग्राह्यः?

प्रसंगेऽस्मिन्नुच्यते यच्छास्त्रेऽसिद्धत्वविषये द्वौ पक्षौ विद्यते, शास्त्रासिद्धपक्षः[19] कार्यासिद्धपक्षश्च[20]। अर्थात् कार्यत्वासिद्धपक्षे परकार्याणि पूर्वकार्येभ्योऽपेक्षया असिद्धानि भवन्ति। रामचन्द्राचार्येण *प्रक्रियाकौमुद्यां* पक्षोऽयमुल्लिखितः। शास्त्रत्वासिद्धे परसूत्राणि पूर्वसूत्रेभ्योऽपेक्षया असिद्धानि भवन्ति। भट्टोजिदीक्षितमते शास्त्रासिद्धपक्ष एव युक्तिसंगतः। तथाहि तेन *मनोरमायां* "पूर्वत्रासिद्धम्" (८/२/१) इति सूत्रव्याख्यायां कार्यासिद्धत्वपक्षे दोषद्वयं दर्शितम्। प्रथमतः 'मनोरथः' इत्यादावुत्वाभाव इति।[21] 'मनस् रथः' इत्यस्मिन् "ससजुषो रुः" (८/२/६६) इत्यनेन सूत्रेण मनसः सकारस्य रुत्वादेशेऽनुबन्धलोपे च 'मनर् रथः' इति जाते, तत्र युगपत् "हशि च" (३/१/११४) इत्यनेन मनो रेफस्योकारादेशे "रो रि" (८/३/१४) इत्यनेन सूत्रेण रेफस्य लोपादेशे च प्राप्ते "विप्रतिषेधे परं कार्यम्" (१/४/२) इत्यनेन सूत्रेण परत्वाल्लोपविधायकसूत्रस्य प्रवृत्तौ रलोपे संयोगे 'मनरथः' इति रूपं जायते। 'मनोरथः' इति लक्ष्यस्यानुपपन्नात् कृतलोपकार्यस्यासिद्धत्वं विचिन्त्य तत्र रलोपप्रतियोगि रत्वमारोप्य "हशि च" इति सूत्रेणोत्वादेशेनोक्तपदं सिद्ध्यतीति मतमयुक्तम्। अस्य कारणत्वेन *शब्दरत्ने* 'देवदत्तहन्तृहतः' इति न्याय उक्तः। अर्थाद्देवदत्तस्य हन्तारं हननेन देवदत्तो यथा न जीवति तथा देवदत्तस्थानिनो रोर्हननसदृशलोपात्पुनस्तस्य (रु-कारस्य) दर्शनं न स्यात्। अतः 'रु' इति स्थान्याभावात् "हशि च" इति सूत्रस्याप्रवृत्तौ उत्वाभावेन 'मनोरथः' इति पदमनुपपन्नमिति। [22] अस्य प्रमाणत्वेन शब्द*रत्न*कारेण "अचः परस्मिन्पूर्वविधौ" (१/१/५७), "षत्वतुकोरसिद्धः" (६/१/८६) इत्यनयोः सूत्रयोर्भाष्ये एतत् स्पष्टमित्युक्तम्। इतोऽपि *मनोरमाया*मुक्तं यत्कार्यासिद्धत्वपक्षस्याङ्गीकारे "पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्य[23] इति भाष्यसिद्धान्तस्योल्लङ्घनं स्यात्। *रत्न*कारेणास्य कारणं व्याख्यातं यत्– कार्यासिद्धत्ववादिभिर्लक्ष्ये जातकार्यस्यासिद्धत्वं केवलं प्रवर्तमानस्य सपादसप्ताध्यायीस्थकार्यस्य दृष्ट्या प्रतिपाद्यते। किन्तु तैर्विप्रतिषेधशास्त्रप्रवृत्तौ निमित्तीभूतं त्रैपादिकशास्त्रं तद्बोध्यकार्यं वासिद्धं वक्तुं न शक्यते। अतस्तेषां मते त्रिपाद्यां विप्रतिषेधशास्त्रस्याभावप्रतिपादनपरकस्य हेतोरभावान्*महाभाष्यो*क्तः सिद्धान्तोऽसंगतः स्यात्। कार्यत्वासिद्धवादिमते यदि पूर्वपरपदयोः पूर्वपरशास्त्रजन्यबोधविषयकार्यलक्षणया शास्त्रे स्वजन्यबोधविषयतासंबन्धेन कार्यत्वासिद्धमित्युच्यते, तर्हि भाष्यकथनस्य संगतिः स्यादिति। *रत्न*कारमते तु लक्षणाया मानाभावात्फलाभावाद्गौरवाच्चेयं युक्तिरसंगतैव।[24] प्रथमोक्तदोषे कस्माच्चिदसारत्वाद् ग्रन्थकारेण द्वितीयदोष उपस्थाप्यते- "अमू अमी इत्यादि च न सिद्ध्येत" इति।[25] *शब्दरत्ने*ऽस्याशयो व्याख्यातः। यथा अदस्-शब्दस्योत्तरं प्रथमाया द्विवचने बहुवचने च यथाक्रमं विभक्तिविधानेनानुबन्धलोपे 'अदस् औ' 'अदस् अस्' इति च जाते, "त्यदादीनामः" (७/३/१०२) इत्यनेन सूत्रेणादसः सकारस्याकारादेशे 'अद अ औ' 'अद अ अस्' इति स्थिते "अदसोऽसेर्दादुदोमः" (८/२/८०) "एत इद्बहुवचने" (८/२/८१) इत्याभ्यां यथाक्रमेण मुत्वेत्वयोरादौ प्रवृत्तौ 'अमु अ औ' 'अमी अ अस्' इति जाते, ततः "अतो गुणे" (६/१/९७) इत्यनेन विहितस्य पररूपकार्यस्य दृष्ट्या असिद्धत्वेऽपि 'देवदत्तस्य हन्तरि हते सति नोन्मज्जनम्' इति न्यायेन मुत्वेत्वाभ्यामपहतस्य दत्वस्य तत्रासत्त्वात् पररूपाप्रसंगेन 'अमू' 'अमी' इति रूपद्वयं न सिद्ध्यति। दीक्षितमते उपर्युक्तदोषाणां निराकरणं केवलं शास्त्रत्वासिद्धपक्ष एव संभवति। तथाहि तेन पक्षममुमाश्रित्य शास्त्रासिद्धपरकवृत्तिः कृता, न तु कार्यासिद्धपरकवृत्तिः। तद्यथा– "त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धं स्यात्" इति।[26] *मनोरमा*कारमते एतादृशव्याख्यानेनैव त्रिपाद्यां विहितं कार्यमसिद्धमित्यादि प्राचीनोक्तमतं खण्डितम्।

नागेशाचार्येणापि सूत्रेऽस्मिन् कार्यत्वासिद्धपक्षे दोषं प्रदर्श्य शास्त्रत्वासिद्धापक्षो स्वीक्रियते स्म। तन्मते सूत्रेऽस्मिन् कार्यत्वासिद्धपक्षस्वीकारे 'अमू' इत्यादावसिद्धिः स्यात्। किन्तु शास्त्रासिद्धत्वपक्षे "अतो गुणे" (६/१/९३) "अदसोऽसेर्दादु दो मः" (८/२/८०) इति सूत्रयोर्युगपत्प्राप्तौ गुणविधायकशास्त्रस्य दृष्ट्या मुत्वविधायक-

शास्त्रस्यासिद्धतया पूर्वं गुणे कृते पररूपे 'अद् अ औ' इति जाते ततो वृद्धिना समं मुत्वकार्यस्य प्राप्ते त्रिपादित्वादसिद्धत्वे पूर्वं वृद्धौ संयोगे च 'अदौ' इति स्थिते ततः "अदसोऽसेर्दादु दो मः" इत्यनेन मुत्वे ऊत्वे च 'अमू' इति प्रयोगः सिद्धः।

## ५. सिद्धान्तः

उपर्युक्तालोचनेन पाणिनीयशास्त्रेऽसिद्धत्वमिति पारिभाषिकशब्दविषये यो विचारो विद्यते, स सविस्तारं स्थापितः। अस्मादालोचनाद् असिद्धत्वविषये वयं यथाशास्त्रं सिद्धान्तं ग्रहिष्यामः। प्रथमतो नागेशेन *लघुशब्देन्दुशेखरे* "पूर्वत्रासिद्धम्" (८/२/१) इति सूत्रस्य व्याख्यायां सिद्धशब्दस्य बहुविधार्थोपस्थापनेन तद्वीपरीतस्या-सिद्धशब्दस्याप्रवृत्तमनिष्पन्नं वेत्यर्थः स्पष्टीकृतः। इतोऽपि शास्त्रत्वासिद्धपक्षे विशेषस्थलमुक्त्वा तत्र सूत्रस्य कीदृशोऽर्थः स्यात्? सोऽपि परिष्कृतः। अतोऽसिद्धशब्दस्यार्थः शास्त्रे द्विधा प्रयुङ्क्ते स्म, १. अविद्यमानम् २. अनिष्पन्नम्। प्रथमार्थग्रहणे "पूर्वत्रासिद्धम्" इति सूत्रस्य दीक्षितकृतवृत्तेरर्थो भवति- सपादसप्ताध्यायीस्थसूत्राणां कृते त्रिपादीस्थसूत्राणि न विद्यन्ते। ख. त्रिपादीस्थसूत्रानां कृते तदनन्तरं किमपि सूत्रं न विद्यते। अस्याशयस्तावत् कस्मिञ्चिल्लक्ष्ये युगपत् सपादसप्ताध्यीस्थत्रिपादीस्थसूत्रयोः प्राप्तौ त्रिपादीस्थसूत्रमविद्यमानवद्भवति। तल्लक्ष्ये सपादसप्ताध्यायीस्थसूत्रस्यैव प्रवृत्तिर्भवति। द्वितीयार्थग्रहणे असिद्धशब्दस्यार्थो भवति- त्रिपादीसूत्रैः यत्कार्यं विधीयते तत्सपादसप्ताध्यायीसूत्रैर्न दृश्यते। अर्थात्त्रिपादीस्थसूत्रैः कृतकार्यस्यानिष्पन्नत्वात्तदाधारेण सपादसप्ताध्यायीस्थसूत्राणां प्रवृत्तिर्न भवति। एवं त्रिपाद्याः पूर्वसूत्रैः तत्रस्थानां परसूत्राणामदर्शनं भवति। अर्थात्त्रिपादीस्थपरसूत्रैः जातं लोपागमादिकार्यं त्रिपादीस्थपूर्वसूत्रैर्न दृश्यते। नागेशमते यत्रान्तरङ्गत्वात्त्रिपादीसूत्रं सपादसप्ताध्यायीस्थसूत्रात्प्रागेव प्रवर्तते तत्रासिद्धशब्दस्यार्थोऽभावो वर्तते। अर्थात्त्रिपादीस्थसूत्रस्याभावस्यारोपः क्रियते। तेन त्रैपादिकसूत्रेण कृतकार्यस्या-भावात्स्थानिनोऽनिवृत्तिबुद्ध्या सपादसप्ताध्यायीस्थसूत्रैः करणीयं कार्यं यथावत्स्यात्। "षत्वतुकोऽसिद्धः" (६/१/८६) इत्यस्मिन् विद्यमानस्यासिद्धपदेन 'कोऽस्य' इति पदस्य सिद्ध्यर्थमेकदेशाधिकारे "आदेशप्रत्यययोः" (८/३/५९) इति सूत्रस्य प्रवृत्तिर्निषिध्यते। अत्रासिद्धस्याविद्यमानार्थः प्रतीयते। 'अधीत्य' इत्यस्य सिद्ध्यर्थं प्रकृतसूत्रेण तुगागमे "अकः सवर्णे दीर्घः" (६/१/१०१) इत्यनेन जातैकादेशोऽसिद्धः क्रियते। अत्रासिद्धपदस्य एकादेशस्यानिष्पन्नरूपार्थः प्रतीयते। "असिद्धवदत्राभात्" (६/४/२२) इत्यस्मिन्नपि असिद्धशब्दः 'जहि' इत्यादिपदानां सिद्धये समानाश्रितद्वितीयसूत्रस्य निषेधार्थं प्रयुक्तः। लक्ष्ये "अतो हेः" (६/४/१०५) इति द्वितीयसूत्रस्य कृते "हन्तेर्जः" (६/४/३६) इति प्रथमसूत्रमसिद्धम्। अर्थात्प्रथमसूत्रेण कृत आदेशः "अतोः हेः" इति सूत्रेण न दृश्यते। अत्रासिद्धस्यानिष्पन्नार्थः।

असिद्धत्वविषये यानि सूत्राणि प्रयुक्तानि तेषां "पूर्वत्रासिद्धम्" इत्यधिकारसूत्रम्। अस्याधिकारत्वे शास्त्रकाराः प्रमाणानि दत्तवन्तः। भट्टोजिदीक्षितेन वृत्तौ 'अधिकारोऽयम्' इत्युक्त्वा अस्याधिकारस्य फलमुक्तम्। नागेशेनापि सूत्रस्यास्याधिकारत्वे सममतं पोष्यते, नात्र विशेषः। विषयेऽस्मिन्नुभयोः कोऽपि विरोधो नास्ति। "असिद्धवदत्राभात्" इत्यपि अधिकारसूत्रम्। "षत्वतुकोऽसिद्धः" इति सूत्रं यद्यपि अधिकारसूत्रं न, तथापीदम् "एकः पूर्वपरयोः" (६/१/८४) इति एकादेशाधिकारे सत् शब्दानां साधुत्वं रक्षति। लक्ष्योपयोगित्वादसिद्धत्वविधायकानां सूत्राणामधिकारसूत्रत्वेन प्रयोग इति मन्मतम्।

असिद्धत्वविधायकसूत्रेषु असिद्धवचनस्य प्रयोजनविषये पूर्वं यदालोचितं ततः प्रतीयते यत्- असिद्धकरणस्य प्रयोजनद्वयम्। प्रथमत आदेशलक्षणस्य प्रतिषेधार्थम्। द्वितीयत उत्सर्गलक्षणस्य भावार्थम्। पतञ्जलिना उपर्युक्तस्य प्रत्येकं सूत्रस्य भाष्येऽसिद्धवचनस्य प्रयोजनदर्शनावसरे एतत्स्पष्टतया उक्तम्। तथाहि विषयेऽस्मिन् नाधिकं वक्तव्यम्।

असिद्धत्वे कः पक्षो ग्राह्यः स्यादिति प्रश्ने दीक्षितेन *मनोरमा*यां कार्यत्वासिद्धे मनोरथादौ दोषान्प्रदर्श्य शास्त्रत्वासिद्धपक्ष आश्रीयते। तथाहि तेनोक्तम्- "एतेन त्रिपाद्यां विहितं कार्यमसिद्धमित्यादिः प्राचां ग्रन्थः परास्तः" इति।[27] नागेशाचार्येन कार्यत्वासिद्धे 'अमू' इत्यादिरूपासिद्धिरूपदोषान् दर्शयित्वा शास्त्रत्वासिद्धपक्षः स्वीकृतः। *भाष्य*कारेण "असिद्धवदत्राभात्" (६/४/२२) इति सूत्रभाष्ये शास्त्रत्वासिद्धपक्षः सिद्धान्तितः। अतोऽसिद्धत्वे शास्त्रत्वासिद्धपक्षो वैध इति प्रतीयते।

अतोऽन्तिमे उच्यते यत्- पाणिनिना *अष्टाध्याय्यां* पदानां व्युत्पत्तये विविधकौशलानामवलम्बनं कृतम्। तेष्वसिद्धत्वमन्यतमः कौशलः। वस्तुतस्तु पाणिनीयव्याकरणे शब्दानां व्युत्पत्तये या क्रमिककार्यव्यवस्था विद्यते, तस्या नियन्त्रकमिदमसिद्धत्वमिति शम्।

## तथ्यपञ्जिः

1. जयशङ्करलाल-त्रिपाठी (सम्पा.), *काशिका* (दशमो भागः), पृष्टा- १०८
2. "अधिकारोऽयम्। तेन सपादसमप्ताध्यायीं प्रति त्रिपाद्यसिद्धा। त्रिपाद्यमपि पूर्वं प्रति परं शास्त्रमसिद्धं स्यात्" इति।- गिरिधरशर्मा चतुर्वेदः/ परमेश्वरानन्दशर्मा विद्याभास्करः (संपा.), *वैयाकरणसिद्धान्तकौमुदी* (प्रथमो भागः), पृष्ठा २०
3. "यद्ययं स्वतन्त्रविधिः स्यात्, तर्हि 'त्रिपादी पूर्वं प्रत्यसिद्धा' इत्येव लभ्येत, त्रैपादिकं तु पूर्वं प्रति परं नासिद्धं स्यादत आह अधिकारोऽयमिति"।– सदाशिवशर्मा शास्त्री (संपा.), *प्रौढमनोरमा* (अव्ययीभावान्ता, प्रथमो भागः), पृष्ठा ३२
4. नन्दकिशोर-शास्त्री (सम्पा.), *लघुशब्देन्दुशेखरः* (अव्ययीभावान्तो भागः), पृष्ठा १०९
5. "शास्त्रासिद्धत्वे तु- यत्राप्यन्तरङ्गत्वात्त्रैपादिकं प्रवृत्तं तत्रापि- तत्तच्छास्त्रे एवाभावारोपेण तन्निवृत्तिबुद्धेरभाव, आदेशबुद्ध्यभावो लक्ष्ये जातत्वबुद्ध्यभावश्च। जायमानं कार्यन्त्वादेशे एव स्थानिबुद्ध्या प्रवर्त्तते" इति।– *तदेव*, पृष्ठा ११०
6. जयशङ्करलाल-त्रिपाठी/ सुधाकर-मालवीयः (सम्पा.), *काशिका* (षष्ठो भागः), पृष्ठा. १२७
7. तत्रैव
8. गिरिधर-शर्मा चतुर्वेदः/ परमेश्वरानन्दशर्मा विद्याभास्करः (सम्पा.), *वैयाकरणसिद्धान्तकौमुदी* (चतुर्थो भागः), पृष्ठा ३५९
9. *काशिका*यां प्रस्तुतसूत्रस्य वृत्तौ वार्त्तिकमिदमुल्लिखितम्।
10. जयशङ्करलाल-त्रिपाठी/ सुधाकरमालवीयः (सम्पा.), *काशिका* (सप्तमो भागः), पृष्ठा. १७५
11. गिरिधरशर्मा चतुर्वेदः/ परमेश्वरानन्दशर्मा विद्याभास्करः (सम्पा.), *वैयाकरणसिद्धान्तकौमुदी* (तृतीयो भागः), पृष्ठा. २४
12. कृष्णमिश्रः (प्रका.), *परिभाषेन्दुशेखरः*, पृष्ठा २५०
13. जयशङ्करलाल-त्रिपाठी/ सुधाकर-मालवीयः (सम्पा.), *काशिका* (दशमो भागः), पृष्ठा- ११०
14. "अथाऽसिद्धवचनं किमर्थम्॥ असिद्धवचनमुक्तम्॥ [असिद्धवचने उक्तम्]॥ किमुक्तम्?(३)॥ तत्र(४) तावदुक्तं-षत्वतुकोरसिद्धवचनमादेशलक्षणप्रतिषेधार्थ-मुत्सर्गलक्षणभावार्थं चेति। एवमिहाऽपि पूर्वत्राऽसिद्धवचनमादेशलक्षण-प्रतिषेधार्थमुत्सर्ग-लक्षणावार्थं च। आदेशलक्षणप्रतिषेधार्थं तावत्- राजभिः तक्षभिः राजभ्यां तक्षभ्याम् राजसु तक्षसु इति। नलोपे कृतेऽत इत्यैस्भावादयः प्राप्नुवन्ति। असिद्धत्वान्न भवन्ति। उत्सर्गलक्षणभावार्थं च- अमुष्मै अमुष्मात् अमुष्य अमुष्मिन्निति। अत्र मुभावेऽत इति स्मायादयो न प्राप्नुवन्ति, असिद्धत्वाद्भवन्ति"।- दधिराम-शर्मा (सम्पा.) *व्याकरणमहाभाष्यम्* (षष्ठं खण्डम्), पृष्ठा- ७९ (अष्टमाध्याये)
15. भार्गवशास्त्री जोशी (सम्पा.), *व्याकरणमहाभाष्यम्* (पञ्चमं खण्डम्), पृष्ठा ९३
16. जयशङ्करलाल-त्रिपाठी/ सुधाकर-मालवीयः (सम्पा.), *काशिका* (सप्तमो भागः), पृष्ठा १२८
17. ।असिद्धवचने उक्तम्।।- भार्गवशास्त्री जोशी (सम्पा.), *व्याकरणमहाभाष्यम्* ( पञ्चमं खण्डम्), पृष्ठा. २८६
18. तत्रैव
19. "यदा सूत्रदृष्ट्या शास्त्रस्य= सूत्रस्यासिद्धत्वं बोध्यते तदा शास्त्रासिद्धपक्षः" इति।– ब्रह्मदत्त-द्विवेदी (सम्पा.), *लघुशब्देन्दुशेखरः* (पञ्चसन्ध्यन्तभागः), पृष्ठा. ११९
20. "यदा तु शास्त्रविहितकार्यं प्रति शास्त्रविहितकार्यस्यासिद्धत्वं प्रतिपद्यते तदा कार्यासिद्धत्वपक्षः" इति।– तत्रैव

21. "यद्यत्र कार्यासिद्धत्वमिष्यते, तर्हि पूर्वत्रासिद्धमिति 'मनोरथः' इत्यादावुत्वं न स्यात्" इति।- सदाशिव-शर्मा-शास्त्री (सम्पा.) *प्रौढमनोरमा* (अव्ययीभावान्ता, प्रथमो भागः), पृष्ठा ३२-३३
22. "सिद्धेऽसिद्धत्वारोपात् सूत्रोदाहरणसम्पत्त्यै परत्वाल्लक्ष्ये कार्यप्रवृत्तेरावश्यकतया परत्वात्तैपादिके कार्ये जाते तत्राभावप्रतियोगित्वारोपेऽपि देवदतहन्तृहतन्यायेन स्थानिभूतरोरभावाद् "हशि च" (पा.सू. ६/१/११४) इत्यस्याप्राप्तिरिति भावः" इति।– तत्रैव
23. दधिराम-शर्मा (सम्पा.), *व्याकरणमहाभाष्यम्* (षष्ठं खण्डम्), पृष्ठा ७७
24. "न च ममापि पूर्वपरपदयोः पूर्वपरशास्त्रजन्यबोधविषयकार्यलक्षणया शास्त्रे एव कार्यत्वासिद्धमिति वाच्यम्। लक्षणायां मानाभाववात्, फलाभावात्, गौरवाच्च" इति।– सदाशिव-शर्मा-शास्त्री (सम्पा.) *प्रागुक्तम्*, पृष्ठा ३४
25. *तदेव*, पृष्ठा ३३
26. गिरिधर-शर्मा चतुर्वेदः/ परमेश्वरानन्द-शर्मा (संपा.), *वैयाकरणसद्धान्तकौमुदी* (प्रथमो भागः), पृ. २०
27. सदाशिव-शर्मा-शास्त्री (सम्पा.) *प्रागुक्तम्*, पृष्ठा ३६

## ग्रन्थपञ्जिः


1. नागेशभट्टः। *लघुशब्देन्दुशेखरः*। सम्पा. नन्दकिशोर-शास्त्री। (अव्ययीभावान्तो भागः)। काशी (अधुना वाराणसी) : भार्गव-पुस्तकालयः, १९३६। (श्रीराजस्थान-कलेज्-ग्रन्थमाला, चतुर्दशं कुसुमम्)।
2. ___। व्या.का. ब्रह्मदत्त-द्विवेदी। *राधिका* संस्कृत-हिन्दीव्याख्याद्वयोपेतः (पञ्चसन्ध्यन्तो भागः)। पाटना सिटी (अधुना पाटना) : सुशील-प्रकाशनम्, १९८८।
3. ___। व्या.का. विश्वनाथ-मिश्रः। *सुबोधिनी*-हिन्दी-व्याख्योपेतः (पञ्चसंध्यन्तो भागः)। दिल्ली : चौखाम्बा-संस्कृत-प्रतिष्ठानम्, २०१२ । (पु.मु. संस्क.)। (चौखैम्बा-प्राच्यभारती-ग्रन्थमाला ९१)।
4. ___। *परिभाषेन्दुशेखरः*। प्रकाशकः- कृष्णमिश्रः। जयदेव-मिश्रविरचितः विजया-टीका-परिष्कृतः (तृतीयावृत्तिः)। वाराणसी : १९४२
5. पतंजलिः। *महाभाष्यम् (=व्याकरणमहाभाष्यम्)*। सम्पा. भार्गवशास्त्री जोशी। नागेशभट्टविरचित-*भाष्य-प्रदीपोद्द्योतो*द्भासितेन कैयटप्रणीत-*भाष्यप्रदीपेन* समुल्लासितम् (प्रथमं खण्डम्, चतुर्थं खण्डम्, पञ्चमं खण्डं च)। दिल्ली : चौखाम्बा-संस्कृत-प्रतिष्टानम्, १९८७ ।( प्रथमं खण्डम्, पु.मु. संस्क.)। १९८८। (चतुर्थं पञ्चमं च खण्डे, पु.मु. संस्क.)।
6. ___। सम्पा. शिवदत्त-शर्मा (द्वितीयखण्डम्), शिवदत्त-शर्मा रघुनाथ-काशीनाथ-शास्त्री च (तृतीयं खण्डम्)। नागेशभट्टविरचित-*भाष्य-प्रदीपोद्द्योतो*द्भासितेन कैयटप्रणीत-*भाष्यप्रदीपेन* समुल्लासितम्। (द्वितीयखण्डं तृतीयखण्डं च)। दिल्ली : चौखाम्बा-संस्कृत-प्रतिष्टानम्, १९८८। (पु.मु. संस्क.)।
7. ___। सम्पा. दधिराम-शर्मा। नागेशभट्टविरचित-*भाष्य-प्रदीपोद्द्योतो*द्भासितेन कैयटप्रणीत-*भाष्यप्रदीपेन* समुल्लासितम् (षष्ठं खण्डम्)। दिल्ली : चौखाम्बा-संस्कृत-प्रतिष्टानम्, १९८८। (पु.मु. संस्क.)।
8. भट्टोजिदीक्षितः। *वैयाकरणसिद्धान्तकौमुदी*। सम्पा. गिरिधरशर्मा चतुर्वेदः परमेश्वरानन्दशर्मा विद्याभास्करश्च। *बालमनोरमा-तत्त्वबोधिनी*सहिता। चतुर्भि भागैर्विभक्ता। दिल्ली : मोतीलाल-वनारसीदास, २०१० (प्रथम-द्वितीयभागयोः, पु.मु.संस्क.; प्रथमं संस्क.१९६२ तमे वर्षे), २०११। (तृतीय-चतुर्थभागयोः, पु.मु. संस्क.)।
9. भट्टोजिदीक्षितः। *प्रौढमनोरमा*। सम्पा. सदाशिव-शास्त्री। भैरव-मिश्रविरचित-*रत्नप्रकाशिका*-व्याख्याया माधव-शास्त्रि-भाण्डारी-कृत-*प्रभा*-टीप्पण्या जगन्नाथ-शास्त्रि-पाण्डेयकृत-*शब्दरत्नप्रदीप* इति टीप्पण्या च समुल्लासिता (अव्ययीभावान्ता, भागः १)। वाराणसी : चौखाम्बा- संस्कृत-सीरिज्-आफिस्, वि.सं १९९२। (पु.मु. संस्क.)। (हरिदास-संस्कृत-ग्रन्थमाला/काशी-संस्कृत-सीरिज्-पुस्तकमाला ५८, व्याकरण-विभागे-नवमं (९) पुष्पम्)।
10. ___। सम्पा. जयशङ्करलाल-त्रिपाठी। *भावप्रकाशिका भाववोधिनी* इति संस्कृत-हिन्दी-व्याख्योद्वयोपेता (पञ्चसन्धिपर्यन्ता)। वाराणसी : कृष्णदास-अकादमी, १९८६ । (कृष्णदास-संस्कृत-सिरीज् ९१)।
11. वामन-जयादित्यौ। *काशिका*। सम्पा. जयशङ्करलाल-त्रिपाठी, सुधाकर-मालवीयश्च। जिनेन्द्रवुद्धि-विरचितया *न्यासा*परपर्याया-*काशिकाविवरणपञ्जिका*खया हरदत्तविरचितया *पदमञ्जरी*समाख्यया व्याख्यया च सहिता जयशङ्करलाल-त्रिपाठि-विरचितया *भावबोधिनी*-हिन्दीव्याख्याया विभूषिता। दश भागैः प्रकाशिता। वाराणसी : तारा-प्रिण्टिं वर्क्स, १९८६ (प्रथम-द्वितीयभागयोः) १९८७ (तृतीय-चतुर्थभागयोः), १९८८ (पञ्चमभागस्य), १९८९ (षष्ठभागस्य), १९९० (सप्तमभागस्य) १९९१ (अष्टमभागस्य), १९९४ (नवमभागस्य) २००० (दशमभागस्य)। [प्राच्य-भारतीय-ग्रन्थमाला १७-२० (१- ४ भागानाम्) २५-२६ (५- ६ भागयोः), २९-३० (७- ८ भागयोः), ३५-३४ (९- १० भागयोः)]।
12. रामचन्द्रः। *प्रक्रियाकौमुदी*। सम्पा. कमलाशङ्कर-प्राणशङ्कर-त्रिवेदी। विठ्ठलाचार्यकृता *प्रसादाख्य*टीका सहेता (भागद्वयेन समन्विता)। पुना: भाण्डारकर ओरियेनटाल् रिसार्च इनस्टिट्यट्, १९२५।
13. ___। सम्पा. मुरलीधर-मिश्रः। श्रीकृष्ण-विरचितया *प्रकाश*-व्याख्यया मुरलीधरकृतया रश्मि-टिप्पण्या च संवलिता (भागत्रयेण प्रकाशिता)। वाराणसी : संपूर्णानन्द-संस्कृत-विश्वविद्यालयः, २०००। (द्वितीयं संस्क.)। (सरस्वतीभवन-ग्रन्थमाला १११)।


## English Books


1. Cardona, George. Pāṇini. Delhi: Motilal Banarsidass Publishers Pvt. Ltd., 1997 (2nd ed.).
2. Vasu, Śrīśa Chandra. The Aṣtadhyayi of Pāṇini. Vol. I. Delhi: Motilal Banarsidass Publishers Pvt. Ltd., 1977 (rpt.), 1891 (1st ed. from Allahabad).
3. Vasu, Śrīśa Chandra. The Siddhānta Kaumudī. Vol. I. Delhi: Motilal Banarsidass Publishers Pvt. Ltd., 2003 (rpt.), 1962 (2nd ed.).
4. Vasu, Śrīśa Chandra. The Siddhānta Kaumudī. Vol. II. Delhi: Motilal Banarsidass Publishers Pvt. Ltd., 1995 (rpt.), 1906 (1st ed. from Allahabad).